"सञ्चारिते चागुरुसारयोनौ
धूपे समुत्सर्पति वैजयन्तीः ॥")
जयन्तीध्वजः । इति मेदिनी ॥ अग्निमन्थवृक्षः । इति हेमचन्द्रः ॥ पञ्चवर्णमयी जानुपर्य्यन्तलम्बिता माला । यथा,—
"उपगीयमान उद्गायन् वनिताशतयूथपः ।
मालां बिभ्रद्वैजयन्तीं व्यचरन् मण्डयन् वनम् ॥"
इति श्रीभागवते १० स्कन्धे ३९ अध्यायः ॥

वैजयिः, पुं, मघवा । स तु जिनचक्रवर्त्तिविशेषः । इति हेमचन्द्रः ॥

वैजयिकं, त्रि, (विजयस्य निमित्तं विजयिना संयोग इति वा । विजय+"तस्य निमित्तमिति ।" ५ । १ । ३८ । इति ठञ् ।) विजयसम्बन्धि । इति सिद्धान्तकौमुदी । (यथा, हरिवंशे । २४२ । ३९ ।
"रणे प्रवेशसदृशं कर्म्म वैजयिकं कृतम् ॥")

वै(बै)जिकं, क्ली, (वीजादुत्पन्नम् । वीज+ठक् ।) शिग्रुतैलम् । हेतुः । इति मेदिनी ॥ आत्मा । इति शब्दमाला ॥

वै(बै)जिकः, पुं, सद्योऽङ्कुरः । इति मेदिनी ॥ वीज, सम्बन्धिनि, त्रि ॥ (वीर्य्यसम्बन्धिनि च त्रि । यथा, मनौ । २ । २७ ।
"गार्भैर्होमैर्जातकर्म्मचौड़मौञ्जीनिबन्धनैः ।
वैजिकं गार्भिकञ्चैनो द्विजानामपमृज्यते ॥")

वैज्ञानिकः, त्रि, (विज्ञाने युक्तः । विज्ञान+"तत्र नियुक्तः ।" ४ । ४ । ६९ । इति ठक् ।) निपुणः । इत्यमरः ॥

वै(बै)ड़ालव्रतं, क्ली, (वैड़ालं विड़ालसम्बन्धि व्रतम् ।) दुराचारविशेषः । यथा,—
"यस्य धर्म्मध्वजो नित्यं शक्रध्वज इवोच्छ्रितः ।
प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम् ॥"
इति दानसागरे यमवचनम् ॥

वै(बै)ड़ालव्रतिः, पुं, अन्नाद्यभावात् कृतव्रतचर्य्यः । इति जटाधरः ॥

वै(बै)ड़ालव्रतिकः, पुं, (विड़ालव्रतेन चरतीति । विड़ालव्रत+ठक् ।) छद्मतपस्वी । तत्पर्य्यायः । छद्मतापसः २ सर्व्वाभिसन्धी ३ । इति त्रिकाण्डशेषः ॥ तस्यासंभाष्यत्वं यथा,—
"पाषण्डिनो विकर्म्मस्थान् वैड़ालव्रतिकान्
शठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ।
"यस्य धर्म्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः ।
प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम् ॥"
तद्वान् वैड़ालव्रतिकः । इति तट्टीका ॥

वै(बै)ड़ालव्रती, [न्] पुं, (वैड़ालव्रतमस्यास्तीति । इनिः ।) भण्डतापसः । विड़ालतपस्वी । इति भाषा । यथा, कौर्म्मे उपविभागे ५ अध्याये ।
"छद्मना चरितं यच्च व्रतं रक्षांसि गच्छति ।
अलिङ्गी लिङ्गवेशेन यो लिङ्गमुपजीवति ।
स लिङ्गिनां हरेदेनस्तिर्य्यग्योनौ च जायते ॥
वैड़ालव्रतिनः पापाः सर्व्वधर्म्मविनाशकाः ।
सद्यः पतन्ति पापेषु कर्म्मणस्तस्य तत्फलम् ॥
पाषण्डिनो विकर्म्मस्थान् वामाचारांस्तथैव च ।
पञ्चरात्रान् पाशुपतान् वाङ्मात्रेणापि नार्च्चयेत् ॥"

वैणः, पुं, वेणुजीवी । वेणुशब्दादण्प्रत्ययेन उकारस्य लोपेन च निष्पन्नमिदम् । इति सिद्धान्तकौमुदी ॥ (यथा, याज्ञवल्क्ये । १ । १६१ ।
"वैणाभिशस्तवार्द्धुषिगणिका गणदीक्षिणाम् ॥")

वैणवं, क्ली, (वेणोरिदम् । वेणु+अण्) वेणुफलम् । इत्यमरः ॥ वेणुसम्बन्धिनि, त्रि ॥ (यथा, भागवते । ११ । ३० । २४ ।
"ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनाम् ।
स्पर्द्धाक्रोधः क्षयं निन्ये वैणवोऽग्निर्यथा वनम् ॥")

वैणवः, पुं, (वेणोरवयवो विकारो वा । वेणु+"बिल्वादिभ्योऽण् ।" ४ । ३ । १३६ । इत्यण् ।) उपनयने वेणुदण्डः । तत्पर्य्यायः । राम्भः २ । इत्यमरः ॥ (वेणुः । यथा, महाभारते । ५ । ६० । १६ ।
"भेरीमृदङ्गनिनदैः शङ्खवैणवनिस्वनैः ॥")

वैणविकः, त्रि, (वेणवो वेणुस्तद्वादनं शिल्पमस्य । वैणव+"शिल्पम् ।" ४ । ४ । ५५ । इति ठक् ।) वेणुवादकः । तत्पर्य्यायः । वेणुध्मः २ । इत्यमरः ॥ वैणुकः ३ । इति शब्दरत्नावली ॥

वैणवी, स्त्री, (वेणोर्विकृतिः । वेणु+"बिल्वादिभ्योऽण् ।" ४ । ३ । १३६ । इत्यण् । ततो ङीष् ।) वंशलोचना । इति राजनिर्घण्टः ॥ (वेणुसम्बन्धिनी । यथा, मनुः । ४ । ३६ ।
"वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम् ॥")

वैणिकः, त्रि, (वीणावादनं शिल्पमस्य । वीणा+"शिल्पम् ।" ४ । ४ । ५५ । इति ठक् ।) वीणावादकः । इत्यमरः ॥ (यथा, कथासरित्सागरे । ६३ । १६२ ।
"तच्छ्रुत्वा विहताशोऽपि हसित्वा वैणिको
ययौ ॥")

वैणुकं, क्ली, गजस्य तोदनदण्डम् । तत्तु हस्तिचालनार्थं लौहमुखवंशदण्डम् । तत्पर्य्यायः । तोत्रम् २ । इत्यमरः ॥ वेणुकम् ३ । इति भरतः ॥

वैणुकः, पुं, (वेणुना कायति शब्दायते इति । कै+कः । ततः स्वार्थे अण् ।) वेणुवादकः । इति शब्दरत्नावली ॥

वैणुकीयः, त्रि, (वेणुकस्यायमिति । "वेणुकादिभ्यश्छण् ।" ४ । २ । १३८ । इत्यस्य वार्त्तिकोक्त्या छण् ।) वेणुसम्बन्धीयः । इति सिद्धान्तकौमुदी ।

वैण्यः, पुं, (वेणोरपत्यमिति । वेण+ष्यञ् ।) पृथुः । स तु सूर्य्यवंशीयपञ्चमराजः । यथा,—
"आदिराजः पृथुर्वैण्यो मान्धाता यौवनाश्वकः ॥"
इति जटाधरः ।

वैतंसिकः, त्रि, (वीतंसो मृगपक्ष्यादिबन्धनोपायस्तेन चरतीति । वितंस+"चरति ।" ४ । ४ । ८ । इति ठक् ।) मांसविक्रेता । तत्पर्य्यायः । कौटिकः २ मांसिकः ३ । इत्यमरः ॥ कौटकिकः ४ । इति शब्दरत्नावली ॥ मृगपक्ष्यादिबन्धनोपायो वीतंसः तेन चरतीति वैतंसिकः । इति भरतः ॥ (यथा, महाभारते । ३ । १३ । ११ ।
"इमान् शकुनकान् राजन् हन्ति वैतंसिको यथा ।
एतद्रूपमधर्म्मस्य भूतेषु हि विहिंसता ॥")

वैतनिकः, त्रि, (वेतनेन जीवतीति । वेतन+"वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठक् ।) वेतनभुग्भृत्यः । तत्पर्य्यायः भृतकः २ भृतिभुक् ३ कर्म्मकरः ४ । इत्यमरः ॥ (यथा, उपदेशशतके । २० ।
"चौरो वैतनिकः सन्विराटनगरोषितः कुमारीणाम् ।
नर्त्तयिताऽर्ज्जुन आसीत् भवेदवस्थोचिता
वृत्तिम् ॥")

वैतरणिः, } स्त्री, नरकसिन्धुः । इत्यमरः ॥ "वितरणेन दानेन तीर्य्यते वैतरणी । अणः
वैतरणी, }
विल्वादीप् णौ वैतरणिश्च । अटविपटिघाटीवैतरण्यर्थिशुण्ठीरिति हस्वान्तेषु रुद्रः । ततोऽपि पाच्छोणादीति वा ङीप् । विरुद्धं तरणं वितरणं तदस्यामस्तीति वैतरणीत्यन्ये । वितरणौ विरुद्धे पाताले भवा वैतरणीत्यन्ये । वितरणिर्विनौका तरणभूमिरयं स्वार्थे ण्ये वैतरणीत्येके । सिन्धुर्नदी ।
'नारका जन्तवः प्रेता नदी वैतरणी स्मृता ।'
इति त्रिकाण्डम् ॥"
इति भरतः ॥ * ॥ सा नदी दुर्गन्धा तप्तजला महावेगा अस्थिकेशरक्तपरिपूर्णा यमद्वारे वर्त्तते । यथा,—
"नदी वैतरणी नाम दुर्गन्धा रुधिरावहा ।
उष्णतोया महावेगा अस्थिकेशतरङ्गिणी ॥"
इति प्रायश्चित्तविवेकधृतयमदग्निवचनम् ॥ * ॥
अस्या उत्पत्तिर्यथा,—
मार्कण्डेय उवाच ।
"ततो ब्रह्मादयो देवाः सर्व्वे ते शङ्करान्तिकम् ।
गत्वा हरं संस्तुवुः सार्द्धं योगमायया ॥
शनैश्चरोऽपि भूतशमाश्वाद्यान्तर्हितस्तदा ।
वाष्पवृष्टिं दुराधर्षामवजग्राह मायया ॥
यदा स नाशकद्वाष्पान् सन्धारयितुमर्क्कजः ।
तदा महागिरौ क्षिप्रा वाष्पास्ते जलधारके ॥
लोकालोकस्य निकटे जलधाराह्वयो गिरिः ।
पुष्करद्वीपपृष्ठस्थस्तोयसागरपश्चिमे ॥
स तु सर्व्वप्रमाणेन मेरुपर्व्वतसन्निभः ।
तस्मिन् विन्यस्तवान् वाष्पान् न धर्त्तुं क्षम
ईशितुः ॥
विदीर्णस्तैस्तु वाष्पौघैर्भग्नमध्योऽभवद्द्रुतम् ।
ते वाष्पाः पर्व्वतं भित्त्वा विविशुस्तोयसागरम् ॥
सागरोऽपि सहीतुं तान् शशाक खरानति ।
ततस्तु सागरं मध्ये भित्त्वा वाष्पाः समागताः ॥
तोयधेः प्राग्भवां वेलां स्वशमाश्वाद्विभेद ताम् ।
विभिद्य वेलां ते वाष्पाः पुष्करद्वीपमध्यगाः ॥
नदी वैतरणी भूत्वा पूर्व्वसागरगाभवन् ।
जलधारस्य वेगेन संसर्गात् सागरस्य च ॥
अवाप्य सौम्यतां किञ्चिद्वाष्पास्ते नाभिदन्
क्षितिम् ।
तदाप्यव्याकुला पृथ्वी विदीर्णा स्यान्न चेच्छनिः ॥